International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 117-122
© 2020 IJSR
www.anantaajournal.com
Received: 02-08-2020
Accepted: 10-09-2020

**सङ्गीता-सेन**
गवेषिका, संस्कृतसाहित्यविभागः,
केन्द्रिय-संस्कृत-विश्वविद्यालय,
सदाशिव क्याम्पास, पुरी, ओडिशा,
भारत

**Corresponding Author:**
**सङ्गीता-सेन**
गवेषिका, संस्कृतसाहित्यविभागः,
केन्द्रिय-संस्कृत-विश्वविद्यालय,
सदाशिव क्याम्पास, पुरी, ओडिशा,
भारत

# ऐतिहासिककाव्येषु रामावतारशर्मविरचितस्य अभिनवभारतकाव्यस्याभिनवत्वम्

## सङ्गीता-सेन

**प्रबन्धसार**
अर्वाचीनकविषु अन्यतम खलु महामहोपाध्यायः पण्डितः रामावतारशर्मा। विहारप्रदेशस्य छपडाजिलान्तर्गते एकस्मिन् भूमिहारविद्वान्ब्राह्मणपरिवारे 1877 तमे वर्षे जनिं लभमानोऽयं विद्वद्वरः स्वजीवद्दशायां बहुविधान् ग्रन्थान् व्यरचयत्। तेषु अन्यतम खलु अभिनवभारतमिति काव्यम्। भारतीयमितिवृत्तम् देशान्तरीयमितिवृत्तम् इति विभाजिते तरङ्गद्वये अस्मिन् काव्ये अभिनवपद्धत्या ऐतिहासिकविषयाः परिवेशिताः सन्ति। भारतीयमितिवृत्तमिति तरङ्गनामके भागे यथामति कविना समग्रप्राचीनभारतवर्षस्य सुसमृद्धेतिहासो वर्णितः। देशान्तरीयमृतिवृत्तमिति तरङ्गे मिश्र-रोम-फारसीप्रभृतीनां देशानामितिहासः परिवेशितोऽस्ति। परन्तु प्रबन्धेऽस्मिन् केवलमेव भारतीयेतिवृत्तमित्यंशे वर्णितानां विषयानामभिनवत्वं प्रदर्शनं भविष्यति। विविधप्राचीनार्वाचीनप्रबन्धेभ्यः सयत्नेन वृत्तमाहृत्य समासेन भारतवर्षस्य इतिहासवर्णना अत्र क्रियते। आधुनिकसंस्कृते ऐतिहासिककाव्यविरचनमतीव उत्तमं कार्यं किन्तु अस्य सन्निवेशः जटिलो दुर्भरश्च। परन्तु कविभिः रामावतारशर्ममहोदयैः प्राचीनभारतीयेतिहासस्य अविच्छिन्नज्ञानराशिप्रदानेन एकोत्कृष्टतरकाव्यरूपेण अभिनवभारतमिति काव्यं विनिर्मितम्। अस्मिन् ग्रन्थे प्राचीनभारतवर्षस्य सम्पूर्णेतिहासस्य क्रमिकविवरणमुपलभ्यते। अनुष्टुपछन्दोबद्धः काव्यात्मकः सम्पूर्णग्रन्थोऽयं पञ्चवीचिसमन्वितः। अत्र वीररसस्य प्रावल्यं शृङ्गाररसस्य न्यूनता च परिलक्ष्यते। सरलसंस्कृतेन अत्र प्राचीनभारतेतिहासस्य सुक्ष्मवर्णनमुपलभ्यते योऽतीव प्रशंसनीयः, सर्वेषां मनोग्राही च। अत्र कविवरेण अनेकाः अभिनवशब्दाः प्रयुज्यन्ते अपि च बहूणां परकीयशब्दानां संस्कृतानुवादः कृतः यत्र कवेः स्वकीयतायाः मौलिकभावनायाश्च प्रकाशः परिलक्ष्यते। पुराकालेषु विरचितेषु ऐतिहासिकग्रन्थेषु केवलं कालविशेषस्येतिहासं प्राप्यते। परन्तु केचन पण्डिताः तद्-रीतिं परिवर्त्य समग्रदेशकालाववोधकान् इतिहासविषयकग्रन्थान् विरचयामासुः। रामावतारशर्मविरचितम् अभिनवभारतं महाकाव्यं तद्-रीतेः एव मार्गानुसारीति शिवम्।

**सूचकशब्दाः-** ऐतिहासिककाव्यम्, अभिनवभारतम् , कविः रामावतारशर्मा, अभिनवत्वम्।

- **उपोद्धातः**

विश्वस्य प्राचीना समृद्धभाषा खलु संस्कृतभाषा। इयमेव भाषा भारोपीयभाषावर्गे ज्येष्ठा, ततश्च अस्यां भाषायां प्राचीनतमसाहित्यभाण्डारस्य वेदाः स्मृतयः सुरक्षिता इति तु

सर्वजनविदितमासीत्। ऐतिहासिकमहाकाव्यम्, राजपरिषत्काव्यं, सङ्गीतकाव्यं, रूपकं, गद्यात्मककथाकाव्यं, वैज्ञानिकसाहित्यञ्चेत्यादयो यद् यद् विशिष्टं विद्यास्थानं साहित्यपदेन गृह्यते तत् कृत्स्नमेव संस्कृतभाषया एव विरचितवन्तः क्रान्तदर्शिनः कवयः। अतः सुविशालोऽयं संस्कृतवाङ्मयः। संस्कृतसाहित्याध्ययनं तावत् ऐतिहासिकानामपि परमप्रीतये कल्पते। अद्यावधि संस्कृतसाहित्ये बहुसंख्यकानि ऐतिहासिककाव्यानि विरचितानि सन्ति। प्राचीनैतिहासिकमहाकाव्यद्वयीरूपेण रामायण-महाभारतमिति महाकाव्यद्वयं सुप्रसिद्धमिति श्रुतिरस्ति, परवर्तिनि काले विरचितेषु ऐतिहासिकग्रन्थेषु राजतरङ्गिनी सर्वश्रेष्ठम् ऐतिहासिककाव्यमिति मन्यन्ते समालोचकैः। अपि च वाणभट्टविरचितं हर्षचरितम्, पद्मगुप्तविरचितं नवसाहशाङ्कचरितम्, विल्हनविरचितं कर्णसुन्दरी, हेमचन्द्रविरचितं कुमारपालचरितम्, सन्ध्याकरनन्दीविरचितं रामचरितम्, शम्भूकृतं राजेन्द्रकर्णपुरम्, काश्मीरिकजल्हनस्य सोमपालविलासम्, सोमेश्वरदत्तस्य कीर्तिकौमुदी सुरथोत्सवनश्च, अरिसिंहस्य सुकृतसङ्कीर्तनम्, सर्वानन्दस्य जगदुचरितम् चेते सर्वे ऐतिहासिकग्रन्थाः संस्कृतसाहित्ये लब्धमानाः सन्ति। परन्तु एतेषु सर्वेषु ग्रन्थेषु केवलं कालविशेषस्येतिहासः प्राप्यते। अर्वाचीने काले केचन पण्डिताः ऐतिहासिककाव्यविरचनस्य परम्परायां तद्गतानुगतिकरीतिं परित्यज्य समग्रदेशकालाववोधकान् कतिपयान् ऐतिहासिकग्रन्थान् विरचय्य संस्कृतसाहित्यजगति किञ्चिद् विलक्षणं दृष्टान्तमुस्थापयामासुः। तद्विरचितेषु ऐतिहासिकग्रन्थेषु समग्रप्राचीनभारतवर्षस्य तदुत्तरकालस्य च इतिहासोऽपि परिदृश्यते। अस्मिन् प्रबन्धे अर्वाचीनकवेः रामावतारशर्मविरचितस्य अभिनवभारतमिति ऐतिहासिककाव्यस्य अभिनवत्वमुपस्थापितं भविष्यति।

- कवेः परिचयः

अभिनवभारतमिति काव्यस्य स्रष्टा अर्वाचीनकविः महामहोपाध्यायः पण्डितरामावतारशर्ममहोदयः, विद्वद्वरोऽयं स्वकारयितृप्रतिभावलेन अभिनवभारतमिति ऐतिहासिककाव्यं ग्रथितवान्। काव्यमिदं संस्कृतभाषया मैथिलीलिप्या च लिखितमासीत्। काव्यस्यास्य द्वे तरङ्गे उपलभ्येते। भारतीयमितिवृत्तम् देशान्तरीयमितिवृत्तञ्चेति। प्रबन्धेऽस्मिन् मूलतः भारतीयमितिवृत्तमित्यंशस्यालोचना कृता। अयं महान् कविवरः न चैकानि काव्यानि रचयामास, बहुनि काव्यानि विरचय्य संस्कृतसाहित्यप्रपञ्चमलंकृतवान्। तदीयाः मौलिकग्रन्थाः यथा-

1. मारुतिशतकम् (शतककाव्यम्)
2. शम्भूशतकम् (शतककाव्यम्)
3. कृष्णस्तवककल्पतरुः (पद्यकाव्यम्)
4. मुद्गरदूतम् (दूतकाव्यम्)
5. अभिनवभारतम् (ऐतिहासिककाव्यम्)
6. धीरनैषधरचितम् (नाटकम्)
7. जयप्रकाशचरितचम्पूः (चम्पूकाव्यम्)
8. साहित्यरत्नावली
9. सरस्वत्यष्टकम्
10. वसन्तवर्णनम्
11. चित्रवन्धावतारिका
12. शतश्लोकीयं धर्मशास्त्रम्
13. जोर्जप्रशस्तिः
14. वाङ्मयार्णवकोशः
15. प्रकीर्णप्रबन्धः
16. कलाकौमुदी
17. परमार्थदर्शनम् (दर्शनग्रन्थः)

विहारप्रदेशस्य छापडाजिलान्तर्गते एकस्मिन् भूमिहारविद्वद्ब्राह्मणपरिवारे 1877 तमे वर्षे मार्चमासि षष्ठदिवसे सः कविः भुवनमवततार। तस्य पितृचरणेन देवनारायणपाण्ड्येन स्वकर्मणि नियुक्त्यर्थम् आदिष्टः सः कविः। परन्तु पितुरादेशः तस्य मनसि नानुकूलोऽभवत्। केवलं द्वादशवर्षवयसि संस्कृतशिक्षायाः श्रेष्ठं स्थानं वाराणसीं प्रति तेन समागतम्। अत्रागत्य सः तत्कालस्य श्रेष्ठं गुरुं पण्डितगङ्गाधरशास्त्रिमहोदयं निकषा शिष्यत्वग्रहणं कृतवान्। सः स्वकीयमेधाशक्त्या स्वाधीनतायाः प्राक्काले पाटनाविश्वविद्यालयस्य संस्कृताध्यापकरूपेण नियुक्तोऽभवत्। भारतीयेतिहाससभ्यता संस्कृतिशिल्पकला चेत्यादिषु विषयेषु स विशारद आसीत्। भारतवर्षस्य प्रथमः राष्ट्रपतिः डः राजेन्द्रप्रसादमहोदयः अस्य पण्डितशर्मणः प्रियच्छात्र आसीत्। तेनैव पण्डितशर्मणो मरणादनन्तरं तस्य पाण्डुलिपीणां सम्पादनं कृतम्। तत्पुत्रः पण्डितनलिनविलोचनशर्मा पाटनाविश्वविद्यालयस्य हिन्दीसाहित्यविषयस्य प्राध्यापकपदमलंकृतवान्। हिन्दिसाहित्यजगति 'The Nai Kavita' (नइ कविता) शर्मसूतेन आरभ्यते स्म। साहित्यचर्याख्या काव्यतीर्थाख्या चेत्यादिपरीक्षाः तेन प्रदत्ताः, महामहोपाध्यायपण्डितराजोपाधिभ्यां च

सम्मानितोऽभवत्। सः विविधभाषावित् ऐतिहासिकः गवेषकश्चासीत्। सः निजविद्यावैभवत्वात् तार्किकत्वाच्च समग्रे देशे विशेषः ख्यातोऽभवत्। संस्कृत-हिन्दी-अग्रेजी-फ्रेञ्च-जर्मन-लेटिन चेत्यादिबहुभाषाणां ज्ञाता आसीत् पण्डितरामावातारशर्मा। आङ्गलभाषायाम् उपलव्धमाना विविधविषयाः संस्कृतानुवादेन तस्य महत्वपूर्णमवदानमस्ति।

- अभिनवभारतकाव्यस्य विषयवस्तु

रामावतारशर्मविरचितं अभिनवभारतमिति काव्यं देशभक्तिमूलकं ऐतिहासिककाव्यमेकम्। अनुष्टुपछन्दोबद्धः काव्यात्मकः सम्पूर्णग्रन्थोऽयं पञ्चवीचिसमन्वितः। भारतीयमितिवृत्तम् देशान्तरीयमितिवृत्तमिति तरङ्गद्वये विभाजिते अस्मिन् काव्ये अभिनवपद्धत्या इतिहासविषयाः परिवेशिताः। भारतीयमितिवृत्तमिति भागे 520 पद्येन यथासम्भवं प्राचीनभारतवर्षस्य इतिहासवर्णना कविना विहिता, देशान्तरीयमितिवृत्तमिति भागे 424 पद्येन मिश्र-रोम-फार्सीप्रभृतीनां देशानाम् इतिहासविषयः उपनिवद्धोऽस्ति।

ग्रन्थारम्भे कविराह- विविधप्राचीनार्वाचीनप्रबन्धेभ्यः सयत्नेन वृत्तमाहृत्य भारतवर्षस्य इतिहासवर्णना अत्र प्रस्तुयते-

'प्राचीनेभ्यो निबन्धेभ्यो नवीनेभ्यश्च यत्नतः।
संग्रृह्य भारतस्येतिवृत्तं संक्षिप्तमुच्यते।।' इति

(अभिनवभारतम्-1/1)

ग्रन्थस्य प्रथमवीचौ रामावतारशर्मकृते वर्णने वैदिकसभ्यतायाः सुस्पष्टं विवरणमेकं अस्माभिः प्राप्तम्। आर्यजातेः संस्कृत्या सह प्रागार्यजातेः आचारादिव्यवहारस्य अपि च लौकिकसंस्कृतेः विविधोपादानस्य मिश्रितोरूपोऽयं वैदिकसमाजो वैदिकसभ्यता च। तत्र वैदिकसाहित्याद् इतिहासाच्च आर्यवसतिविषये, तेषां संस्कृतिविषये यानि तथ्यानि उपलब्धानि तदेव वर्णितं रामावातारशर्मना अभिनवभारतमिति काव्ये। अनन्तरं उत्तरवैदिकयुगस्य अर्थात् रामायणमहाभारतयुगस्य वर्णना प्राप्यते काव्ये। सुदा-हरिश्चन्द्र–नलप्रमुखानां कृतयुगानां विशिष्टनृपानामुल्लेखः दृश्यते ग्रन्थे। प्रथमाध्यायस्य अन्तिमे पर्वे महाभारतोरकाले चक्रवर्तीसम्राटाभावात् राजतन्त्रस्य ह्रासः एवञ्च सामन्ततत्रस्याविर्भावो घटते इत्युपवर्णितमासीत्।

द्वितीयवीचेरादौ दक्षिणकूले भागिरथीतीरे मगधदेशस्य मनोहररूपं प्राकृतिकसौन्दर्यञ्च कविना सुष्ठ निगदितम्। कविरुवाच-

'अथ दक्षिणकूले यो भगीरथ्या मनोहरः।
देशोऽस्ति मगधाभिख्यो वसुधामण्डनम्।।' इति

(अभिनवभारतम्- 2/1)

समग्रद्वितीयावीचिमधिकृत्य मौर्यसाम्राज्यस्य वर्णना समुपलभ्यते, अन्तिमे च मौर्यसाम्राज्यपतने कुषाणसाम्राज्यस्याभ्युत्थानविषये कतिपयश्लोकाः विरचिताः जाताः।

अभिनवभारतमिति काव्यस्य तृतीयवीचौ कविना रामावतारशर्मणा समृद्धस्य गुप्तसाम्राज्यस्य वर्णना प्रदत्ता। वीचेरस्याः प्रस्तावनायां कविना भाषितम्-

शतद्वये शकाब्दानामाधित्रिंशे गते ततः।
चन्द्राख्यो गुप्तवंशीयो नृपतिर्मगधानशात्।। इति

(अभिनवभारतम्-3/5)

कविवर्णनायामादौ प्राप्यते प्रथमचन्द्रगुप्तस्योपस्थितिः। महाराजाधिराजः चन्द्रगुप्तः गुप्तसाम्राज्यस्य प्रतिष्ठातृरूपेण परिचित आसीत्। अनन्तरं समुद्रगुप्त-द्वितीयचन्द्रगुप्त-कुमारगुप्तप्रभृतीनां विविधसमृद्धशालिनां गुप्तनृपतीनां वर्णनमुपलभ्यते। गुप्तसाम्राज्यस्य पतनात् परं पुष्यभूतिवंशीयनृपाः राजत्वं चक्रुः, पुष्यभूतिवंशस्य श्रेष्ठनृप आसीत् हर्षबर्धनः, काव्ये तस्य सम्यग् वर्णनमुपलभ्यते। वीचेरस्य अन्तिमे भागे हर्षोत्तरभारतस्यालोचना दृश्यते। चतुर्थवीचेः प्रारम्भे कविः हर्षबर्धनस्य अमात्यस्यार्जुनस्य परवर्तिशासकानाञ्च शासनेतिहासमवर्णयत्। अस्मिन् च काले वहवो नृपाः अजायन्त। तेषां नृपाणां चरित्रवर्णनावसरे काश्मीरराज्यस्य कश्चन इतिहासः परिवेशितः। चन्द्रापीडललितादित्य-जयापीडप्रमुखानां प्रसिद्धनृपानां शासनेतिहासवर्णनादनन्तरं काव्ये पालवंशस्य सेनवंशस्य च समयकाले वङ्गदेशस्य शासनव्यवस्थापि वर्णिता। चतुर्थवीचेरन्तिमे भागे कविः रामावतारशर्मा दिल्लीराज्यस्येतिहासः उपनिबद्धवान्।

पञ्चमवीचौ सूचनापटले दिल्लीराजस्य पृथ्वीराजचौहानस्योल्लेखो दृश्यते। सहापदीन-वादीवसिंह-जैत्रपालप्रमुखानाम् दिल्लीनृपानां तेषां शासनव्यवस्थाणाञ्च विवरणं समुपलभ्यतेऽत्र। अन्तिमे आङ्गलवंशधरराज्यः

व्यक्तोर्जायाः, व्यक्तोर्जासुनोः आद्यव्रतस्य च शासनव्यवस्था उपविन्यस्ता आसीत्।
इत्थं पञ्चवीचिसमन्विते काव्ये प्राचीनभारतवर्षस्य इतिहासः यथामति कविना वर्णितः।

- ऐतिहासिककाव्येषु अभिनवभारतस्याभिनवत्वम्

देवभूमिरूपे भारतभूमौ ऐतिहासिककाव्यविरचनपरम्परा न तु नवीनम्। ध्रुपदिसंस्कृतसाहित्यरचनाकाले विरचिता रामायण-महाभारतमिति महाकाव्यद्वयी अस्याः परम्परायाः प्रतिनिधिस्थानीया कृतिः। भारतीयैः ग्रन्थकारैः रामायणं तावदाद्यमार्षकाव्यम्, अस्य प्रणेता ऋषिः वाल्मीकिश्च आद्यः कविः इत्युच्यते। तदस्मिन् रामायणे न केवलं संग्रामाः विजयाश्चैव उपनिवद्धाः प्रत्युत रूपकोपमाद्यलंकारसमुद्भासितायां प्रकृतिरपि उपवर्णिता। निखिलेऽपि च महीमण्डले किमपि काव्यान्तरं लोकपृणतया रामायणं नातिशेते। लोकप्रसिद्धौ रामायणाद्धीयमानमपि महाभारतं महिम्ना तस्मान्न ह्रीयते। ऐतिहासिकांशे अस्मिन् आर्षकाव्ये पाण्डवधार्तराष्ट्राणामितिहासो मिथः संग्रामश्च विस्तरेण वर्णितः।
अनन्तरं संस्कृते ऐतिहासिककाव्यकारणानामग्रणी तावत् कल्हणो नाम काश्मीरिकपण्डितः, यस्य खलु महती धीरभूत्, यश्च ऐतिहासिकघटनानां कारणकार्यविवेचनपुरःसरं पक्षपातशूण्यमुपन्यासं कर्तुं सक्षम आसीत्। संस्कृतस्य नैकोऽपीतिहासलेखकः अशंतोऽपि कल्हनेन तुल्योऽर्हति। संस्कृत-इतिहासलेखकेषु प्रमुखाः खलु कल्हण एव। तद्विरचिते ग्रन्थे काश्मीरराजवंशानां चरित्रमुपलभ्यते। महती तस्य ऐतिहासिकी प्रतिभा आसीत्, यया प्रतिभया सः तदोपलभ्यमानानां काश्मीरकवंशनामितिवृत्तस्य सुक्ष्मवर्णनं कृतवान्। ग्रन्थे तस्य चरित्रचित्रणं यथाभूतं पक्षपातशूण्यं वर्तते।
वाणभट्टविरचिते हर्षचरितमिति ऐतिहासिककाव्ये हर्षनृपस्य नेदिष्ठपूर्वभाविनां राज्ञां वर्णनमुपलभ्यते। कथा-आख्यायिकयोः परस्परभेदं दर्शयितुमालंकारिकैः हर्षचरितम् आख्यायिकायाः उदाहरणं स्वीकृतम्।
कविपद्मगुप्तविरचितं नवसाहशाङ्कचरितं एकोत्कृष्टतरैतिहासिककाव्यसंज्ञया भूषितमस्ति संस्कृतकाव्यसाहित्यजगति। अष्टादशसर्गात्मके काव्येऽत्र राजसुतायाः शशिप्रभायाः सम्प्राप्तिरेव विषयत्वेन भासते। मालवक्षितिपतेर्नवसाहसाङ्कस्येतिवृत्तवर्णनमप्यत्र कवेर्मुख्यतया विवक्षितमस्ति।
विल्हणस्य कर्णसुन्दरी नामैतिहासिककल्पं रूपकं विक्रमाङ्कदेवचरितं नामैतिहासिकं काव्यञ्च लोके प्रसिद्धम्। कर्णसुन्दर्य्यां कस्यचित् विदर्भराजस्य राजकन्यायाः केनचित् चालुक्यराजकुमारेण सह पाणिग्रहणं वर्णितं कविना। रमणीयपद्यबहुलं काव्यमेतत् कवेर्विशदस्य वस्तुचित्रणस्य योग्यतां स्फुटतरं व्यणक्ति। विक्रमाङ्कदेवचरिते प्रथमं चालुक्यवंशस्य समुद्भवमुपवर्ण्यं विक्रमाङ्कदेवनृपस्य पितुराहवमल्लस्य चरितं विस्तरेणोपनिबद्धं कविना।
कुमारपालचरितमथवा द्व्याश्रयकाव्यरूपेण परिचितस्य ऐतिहासिककाव्यस्य स्रष्टा जैनाचार्यः हेमचन्द्रः। अत्र चालुक्यवंशस्य कुमारपालस्य तत्पूर्ववर्तिनां केषाञ्चित् राज्ञां चरितं निबद्धम्। कवेः हेमचन्द्रस्य स्वप्रणीतव्याकरणे नियमानामुदाहरणानां प्रदर्शणमेव अस्याः काव्यरचनायाः मुख्योद्देश्यम्।
पृथ्वीराजविजये पृथ्वीराजचौहानस्य विजयाः वर्णिताः। काव्यमिदमैतिहासिकानां महते उपयोगाय भवति।
सन्ध्याकरनन्दिनः रामपालचरिते वङ्गनरेशस्य रामपालस्य अवदानानि उपवर्णितानि।
काश्मीरिकजलहणस्य सोमपालविलासे राज्ञः सोमपालविलासस्य चरित्रं गीयते। जल्हनः अलंकारनामकश्मीरक्षितिधरस्य सभापण्डित आसीत् इति तावद् मङ्खोल्लेखात् ज्ञायते।
शम्भुकृतः राजेन्दरकर्णपूरः कश्मीरनरेशस्य हर्षदेवस्य प्रशस्तिः इत्यपि ऐतिहासिककाव्यमेकम्।
इत्थं संस्कृतसाहित्यजगति वहव ऐतिहासिकग्रन्थाः विरच्यन्ते यत्र नृपविशेषस्य राजवंशविशेषस्य च वर्णनमुपलभ्यते। तत्कालिकसमये राजसभायां निवासिनः अमात्याः पण्डिताः प्रमुखाः राजोपजीविनः राजकर्मचारिणः राजानुग्रहेण राज्ञः प्रतिग्रहधनेन च स्वजीवनं धार्यन्ते स्म तदर्थं ते काव्यविरचनमाध्यमेन तान् नृपान् प्रशस्यन्ते। स्वभावतः तेषां रचनायां केवलं तत् नृपस्य चरितवर्णनं स्थानं लभते।
परन्तु रामावतारशर्मविरचिते अभिनवभारताख्ये ऐतिहासिककाव्ये समग्रप्राचीनभारतवर्षस्य क्रमिकेतिहासः परिवेशितः। पुराकालेषु विरचितेषु ऐतिहासिकग्रन्थेषु यत् कालविशेषस्य इतिहासवर्णनं समुपलभ्यते तत् रीतिं परिवर्ज्य सम्पूर्णतया अभिनवपद्धत्या समग्रप्राचीनभारतेतिहासस्य वर्णनं नोऽतीव सरलकर्म, परन्तु कविना स्वकारयितृप्रतिभया निरलसश्रमेण च नीरस इतिहासविषयमपि सरसच्छन्दोमयकाव्यमयाकारप्रदाने सक्षमोऽभवत्। अभिनवभारतमित्याख्ये काव्ये मगध-शुङ्ग-कण्व-शक्-कुषाण-गुप्तप्रभृतीनां बहुनृपाणां क्रमिकेतिहासः श्लोकमाध्यमेन अतिसरलप्राञ्जलभाषया च सुष्ठुरूपेण परिवेशितः। भारतभूमौ राजत्वकारिणां बहुणां नृपानां यथा- हरिश्चन्द्र-रामचन्द्र-अभिमन्यु-जरासन्ध-विम्बिसार-अजातशत्रु-महापद्मनन्द-चन्द्रगुप्तमौर्य-अशोक-पुष्यमित्रशुङ्ग-अग्निमित्रकलिङ्गराज-खारवेल-कणिष्क-प्रथमचन्द्रगुप्त-समुद्रगुप्त-द्वितीयचन्द्रगुप्त-कुमारदास-

कुमारगुप्त-स्कन्दगुप्त-मिहिरकुल-प्रभाकरवर्धन-पुलकेशि-हर्षवर्धनप्रमुखानाम् उल्लेखः काव्ये प्राप्यते। एतान् अतिरिच्य अल्पख्यातिसम्पन्नाः नृपाः अपि कवेः लेखनीमध्ये स्थानं लभन्ते। अपि च कृष्णद्वैपायणव्यासदेव-महामुनिवाल्मीकि-श्रीकृष्ण-गौतमबुद्ध-शाकल्य-गार्ग्य-यास्क-कणाद-भरतमुनि-वररुचि-चाणक्य-शूद्रक-गुणाढ्य-चरक-सुश्रुत-अश्वघोष-नागार्जुन-हरिषेण-पतञ्जलि-फाहियेन-कालिदास-भास-सुबन्धु-वराहमिहिर-मातृगुप्त-भर्तृमेण्ठ-वाणभट्ट-श्रीहर्ष-भर्तृहरि-वाक्पतिराज-कुमारिलभट्ट-भवभूति-मुरारि-दामोदरगुप्त-दण्डी-शंकराचार्य-हलायुध-माघ-रत्नाकर-आनन्दबर्धन-त्रिविक्रमभट्ट-राजशेखर-आर्यक्षेमीश्वर-पद्मगुप्त-भोज-धनपाल-कृष्णमिश्र-कल्हण-श्रीहर्ष-सायणाचार्य-जगन्नाथप्रमुखानां विशिष्टानां कवीनां दार्शनिकानां साहित्यिकानाञ्च संक्षिप्तेतिहासः अत्रोपवर्णितः। प्राचीनभारतेतिहासस्य कोऽपि विषयः प्रायशः अत्र कविना नोपेक्षितः। अभिनवपद्धत्या अभिनवचिन्तामाध्यमेन च स्वकीयमौलिकतायाः बहुलं निदर्शनमत्र पाठकसमीपे उपस्थाप्यते।

प्राचीनभारतवर्षस्येतिहासः सर्वदा नः चित्तमाकर्षयति। कारणं हि तत्काले अस्मिन् भारते विशेषसामाजिकव्यवस्था प्रचलिता आसीत्। अस्मदीयैः कविभिः दार्शनिकैः च सर्वैः भारतवर्षः अखण्डभूमिः इति कथ्यते। भारतवर्षस्यादिकालस्य इतिहासः अत्यन्तरोमहर्षकोऽस्ति। कारणं हि बहुविधानां प्राचीनानां जनगोष्ठीनामाधारो भवति भारतवर्षमिदम्। प्राक् आर्यजनाः भारतीयजनाः, ग्रीकजनाः शकजनाः इत्येताः सर्वाः जनाः भारतभूमिं मातृभूमिं मन्यन्तेति। सुप्राचीनकालादेव भारतभूमिः बहुविधानां धर्माणां सङ्गमस्थलः आसीत्। विशेषतः हिन्दुधर्मो, जैनधर्मो बौद्धधर्मश्चेति धर्माणां जन्मभूमिः इयं भारतभूमिः। एतेषां धर्माणां संस्कृतिः मतादर्शः क्रमशः अङ्गाङ्गीभावेन मिलितो अभवत्। अतः बहुविधकारणत्वात् प्राचीनभारतवर्षस्य इतिहासचर्चा अतीव गुरुत्वपूर्णा। तद्गुरुत्वं मनसि निधाय आधुनिककविना रामावतारशर्मणा अभिनवभारतमिति ऐतिहासिककाव्यं विरचितम्। कवेः प्रयासोऽयं यत् प्राचीनभारतविषये ज्ञानं भवेदिति। तेन कारणेन कविना तत्कालानां बहुविधानि ऐतिहासिकवृत्तानि श्लोकाकारेण लिपिबद्धानि कृतानि। सुविशालभारतेतिहासमवलम्ब्य एतादृशं ग्रन्थविरचनं निःसंशयेन कवेः अभिनवचिन्तनस्य द्योतकम्।

रामावतारशर्मविरचितम् अभिनवभारतं काव्यं न केवलम् ऐतिहासिककाव्यम् अपि च देशभक्तिमूलकं काव्यम्। स्वदेशं प्रति प्रगाढभक्तित्वात् एतादृशी काव्यरचना सम्भवतीति मन्येऽहम्। स्वदेशं प्रति ऐकान्तिकानुरागवशात् कविः स्वदेशे राजत्वकारिणां नृपाणां विशिष्टव्यक्तिनां विषयमवलम्ब्य एतादृशं पद्यकाव्यं विरचयामास। काव्येऽस्मिन् आत्मगौरवपरराष्ट्रियभावनायाः प्रावल्यं परिलक्ष्यते। संस्कृतसाहित्यजगति विद्यमानेषु विविधेषु ऐतिहासिकग्रन्थेषु युगपत् लक्षणद्वयमेदत् किञ्चित् सुदुर्लभम्। वीच्येति अध्यायभागस्य एतादृशे नामकरणविषये अपि नवीनता परिलक्ष्यते। संस्कृतसाहित्यसम्भारे अध्यायद्योतकः वहवः शब्दाः कविभिः प्रयुज्यन्ते। ते यथा, काण्ड-सर्ग-उच्छवास-अधिकरण-उद्योतेत्यादयः। परन्तु वीचिः इत्यनेन अध्यायनामकरणं केवलं अभिनवभारते एव दृश्यते। एतादृशं नामकरणं कवेर्मौलिकचिन्तनस्य परिचयवाही, अतः विषयेऽस्मिन् अभिनवत्वं परिलक्षितम्।

काव्यस्यास्य अपरमेकभिनवत्वं वीररसस्य प्रावल्यं शृङ्गाररसस्य च न्यूनता। अधिकेषु ऐतिहासिकग्रन्थेषु शृङ्गाररसस्य प्रावल्यं परिलक्ष्यते, यतः हि तानि काव्यानि केषाञ्चित् नृपविशेषाणां चरितमवलम्ब्य प्रणीतवन्तः। अतः तेषु काव्येषु नायिकाप्राधाण्यत्वात्तत्र शृङ्गाररसस्योपयोगः परिदृश्यते। परन्तु अभिनवभारते किञ्चित् विलक्षणधारया केवलं नृपाणां साम्राज्यविस्तारविषयाः तेषां राजत्वविषयकतथ्यानि च परिवेशितानि। तत्र नृपानां व्याक्तिजीवनविषये कापि वर्णना न परिदृश्यते। तदर्थं स्वाभाविककारणादत्र शृङ्गारिकभावनायाः न्युनता लक्षणीयेति।

अस्य सर्वापेक्षम् उल्लेखार्हमभिनवत्वम् विविधाभिनवशब्दप्रयोगकौशलम्। अत्र कविवरेण अनेकाः अभिनवशब्दाः प्रयुज्यन्ते, बहूनां परकीयशब्दानां संस्कृतानुवादः स्वच्छन्दतः कृतः, येन कवेः भाषाववोधस्य सम्यक् परिचयः प्रकाशितो जातः। अभिनवभारतमिति काव्यान्तर्गते भारतीयमितिवृत्तिमिति तरङ्गे कविकृतानाम् अभिनवशब्दानां प्रयोगा निम्ने प्रदर्शिताः। यथा-

1. नेपोलियणन् – नयपाल्यः
2. रेल्वे ट्रेन – वाष्पयानम्
3. जापान – कर्पुरद्वीपः
4. रुषियन् – रुष्यः
5. कलम्वास – कुलुम्वः
6. आटलान्टिकसागर –तुङ्गाव्धिः
7. सहापदीन – महम्मदघोरी
8. भिक्टोरिया – व्यस्कोर्जा
9. आलेकजाण्डार – अलिकचन्द्रः

- **उपसंहारः**

परिशेषे वक्तव्यं यत् कविः रामावतारशर्मा एतादृशं ऐतिहासिककाव्यं विरचय्य स्वकीययोग्यतां प्रमाणीकृतवान्। विविधैतिहासिकघटनानां वर्णनं प्रधानतया अत्र विद्यते तथापि अत्र काव्यात्मकसरसतां नोपेक्षितम्। काव्ये शब्दचयने, कथावस्तुनिर्माणे, चरित्रचित्रणे, च सर्वत्रैव कवेः यथार्थाववोधस्य परिचयः परिलक्ष्यते। प्रासङ्गिकवृत्तान्तनिरुपणे अपि कवेः कुशलता निश्चितेन प्रशंसनीया। कविः रामावतारशर्मा तदनुरूपप्रासङ्गिकवृत्तान्तचयने सक्षमोऽभवत्, यद् वृत्तं खलु अत्युत्तमकाव्यविरचने अपरिहार्यं युक्तियुक्तञ्च। इतिहासवत् सरसतास्पर्शविहीनं विषयमवलम्ब्य काव्यरचना न केवलं जटिलमपि तु प्रचलितपरम्पराविरोधी यतः संस्कृतकाव्यपरम्परायां क्रमबद्धभारतीयेतिहासविषयमधिकृत्य काव्यरचनायाः प्रयासः प्रायशो न दृश्यते। परन्तु मनस्वी कार्यार्थी गणयति 'न सुखं न दुःखमि'ति न्यायवाक्यमनुसृत्य कविः रामावतारशर्मा सर्ववाधान् अतिक्रम्य अशेषश्रमं स्वीकृत्य इतिहासकाव्यमिदं व्यरचयत्। आधुनिकसंस्कृतसाहित्यजगति शर्ममहोदयस्य अवाधविचरणमासीत्। तदनुरूपः प्रतिभासम्पन्नः विद्वान् जगति अतीव दुर्लभः। संस्कृतकाव्यजगति भारतेतिहासमवलम्ब्य एतादृशी काव्यरचना कदापि न विस्मरणीयास्माभिः, कवेः तद्विरचितस्य काव्यस्य च ख्यातिः उत्तरोत्तरकाले विस्तारिता भवतु इति प्रबन्धकारस्य आशा इति शम्।

## सहायकग्रन्थपञ्जी

1. अभिनवभारतम् - रामावतारशर्मा
2. त्रिपाठी, राधावल्लभ - संस्कृत वाङ्मयेर वृहत् इतिहास (Vol. 4th)
3. त्रिपाठी, राधावल्लभ - संस्कृत साहित्य विशवीं शताब्दी, राष्ट्रीय संस्कृत संस्थान, नइ दिल्ली, 1999
4. भारतीय चरित कोश – लीलाधर शर्मा, 2009
5. भार्गव, दयानन्द - आधुनिक संस्कृत साहित्य, हंसा प्रकाशनी, पश्चिमबङ्ग, 2015
6. सेन, शुभ्रजित् - भारतवर्षे आधुनिकसंस्कृतसाहित्यम् – विहङ्गमदृष्ट्या परिशीलनम्, संस्कृतपुस्तकभाण्डार, कलकाता, 2019
7. हिन्दि-पद्य-संग्रहः – दिनेश प्रसाद सिं, 2004
8. Ram Avatar Sharma, Wiki Visually – (Date: 15.01.2020, Link: https://en.wikipedia.org/wiki/Ram_Avatar_Sharma)
9. Ram Avatar Sharma, Wikipedia – (Date: 15.01.2020, Link: https://wikivisually.com/wiki/Ram_Avatar_Sharma)